आकाशवाणी, स्त्री, (आकाशादुद्भवा वाणी।) अशरीरिणी वाक्। देववाणी। इति पुराणं॥

आकाशसलिलं, क्ली, (आकाशात्पतितं सलिलं जलं।) दिव्योदकं। इति राजनिर्घण्टः॥

आकिञ्चनं, क्ली, (अकिञ्चनस्य दरिद्रस्य भावः। अकिञ्चन+ष्यञ्।) अकिञ्चनता॥

आकीर्णं, त्रि, (आङ्+कॄ श विक्षेपे+क्तः।) व्याप्तं। तत्पर्य्यायः। संकीर्णं २ सङ्कुलं ३। इत्यमरः। समाकीर्णं ४। इति शब्दरत्नावली॥ (यथा, रघुवंशे। प्रथमसर्गे ५० श्लोकः।
"आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः"॥)
जनादिभिर्निरवकाशं। इति भरतः॥

आकुञ्चनं, त्रि, (आङ्+कुचि+ल्युट्।) न्यायमते पञ्चप्रकारकर्म्मान्तर्गतकर्म्मविशेषः। सङ्कोचः॥ (प्रसारितस्य संक्षिप्तत्वसम्पादनं। नमनं। वक्रतासम्पादनं। यथा। भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च"॥)

आकुलं, त्रि, (आङ्+कुल+कः।) व्याकुलं। तत्पर्य्यायः। व्यस्तं २ अप्रगुणं ३। इत्यमरः॥ (यथा शाकुन्तले। "विभवगुरुभिः कृत्यैस्तस्य प्रतिक्रियमाकुला"॥)

आकूतं, क्ली, (आङ्+कूङ्+क्तः) अभिप्रायः) आशयः। इति हेमचन्द्रः॥ (तात्पर्य्यं। इच्छा। यथा साहित्यदर्पणे। २य परिच्छेदे।
"हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितं"। इति
"हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणैः"॥
इति शाकुन्तले।)

आकृतिः, स्त्री, (आक्रियते इयं गौरयं अश्वः इति व्यज्यतेऽनया। आङ्+कृ+क्तिन्।) रूपं। शरीरं। जातिः। इति मेदिनी॥ (यथा शाकुन्तले प्रथमाङ्के।
"किमिव हि मधुराणां मण्डनं नाकृतीनां"॥
न्यायमते सामान्यं, जातिः। "आकृतिर्जातिलिङ्गाख्या"। इति न्यायसूत्रम्। जातिलिङ्गमित्याख्या यस्याः जातेर्गोत्वादेर्हि सास्नादिसंस्थानविशेषो लिङ्गम्। तस्य च परम्परया व्यञ्जकत्वम्। जातिद्रव्यासमवायिकारणतावच्छेदिकालिङ्गं धर्म्मो यस्याः सा इत्यर्थः इति कश्चित्॥)

आकृतिच्छत्रा, स्त्री, (आकृत्या छत्रमिव या।) घोषातकीवृक्षः। श्वेतघोषा इति भाषा। इति रत्नमाला॥ (घोषकशब्देऽस्या विशेषो ज्ञेयः।)

आकृष्टं, त्रि, (आङ्+कृष्+कर्म्मणि+क्तः।) कृताकर्षणं। आकर्षितं॥ (प्रलोभितः, मुग्धः। यथा हितोपदेशे। "ततो लोभाकृष्टेन केनचित् पान्थेनालोचितं"॥ इति)

आकोकेरः, पुं, मकरराशिः। इति ज्योतिस्तत्त्वं॥

आक्रन्दः, पुं, (आङ्+क्रन्द+घञ्+अच् वा।) रोदनं। यथा रामायणे।
("तासामाक्रन्दशब्देन सहसोद्भ्रान्तलोचनः"।)
आह्वानं। मित्रं। दारुणयुद्धं। भ्राता। इति मेदिनी॥ध्वनिः (यथा रामायणे।
"तत्रैव निशि नानामामाक्रन्दः श्रूयते महान्"॥)
नाथः। पार्ष्णिग्राहात् परो राजा। इति धरणिः। (यथा मानवे ७। २०७।
"पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले"।)

आक्रमः, पुं, (आङ्+क्रम्+अच्।) आक्रमणं। तत्पर्य्यायः। अधिक्रमः २ क्रान्तिः ३। इति हेमचन्द्रः॥ (अधिरोहः। व्याप्तिः। विक्षेपः। अधिगमः। प्राप्तिः। अधिकारः॥)

आक्रमणं, क्ली, (आङ्+क्रम्+ल्युट्।) आक्रमकरणं। ("यः एकवर्त्ती नृपतिः देशाक्रमणाद्याचरति"। इति कुल्लूकभट्टः।) व्यापनं॥ (अतिवर्त्तनं। यथा, रामायणे।
"कण्टकाक्रमणाक्रान्ता वनमद्य गमिष्यति"।
आरोहणम्। यथा रामायणे।
"न देवलोकाक्रमणं नामरत्वमहं वृणे"।)

आक्रान्तः, त्रि, (आङ्+क्रम+क्त) कृताक्रमणः। अधिक्रान्तः। आक्रमविशिष्टः। इति हलायुधः॥ (अभिभूतः। पराभूतः। वशीभूतः। यथा मनुः—
"न पाषण्डिगणाक्रान्ते नोपसृष्टेऽन्त्यजैर्नृभिः"।)

आक्रीड़ः, पुं, (आङ्+क्रीड़+घञ्।) राजोपवनं। राज्ञः साधारणं वनं। इत्यमरः॥ (केलीकाननं, लीलास्थानं। यथा, रामायणे।
"आक्रीड़ालङ्कृतं स्फीतं सुविभक्तं सुसंस्कृतं"।
तथा च कुमारे। २। ६७।
"आक्रीड़पर्व्वतास्तेन कल्पिताः स्वेषु वेश्मसु"।
कुरुत्यामन्दपपुत्रः स्वनामख्यातः पौरवः"॥
यथा हरिवंशे।
"दुष्मन्तस्य तु दायादः कुरुत्यामः प्रजेश्वरः।
कुरुत्यामादथाक्रीड़श्चत्वारस्तस्य चात्मजाः"॥)

आक्रोशः, पुं, (आङ्+क्रुश+घञ्।) क्रोधात्कर्त्तव्यनिश्चयः। तत्पर्य्यायः। आक्षेपः २ अभिषङ्गः ३ शापः ४। इति हेमचन्द्रः॥ (यथा रामायणे।
"आक्रोशं मम मातुश्च प्रमार्ज्य पुरुषर्षभ" इति।)

आक्रोशनं, क्ली, (आङ्+क्रुश्+ल्युट्।) अभिशापः। तत्पर्य्यायः। अभिषङ्गः २ अभीषङ्गः ३। इत्यमरः॥

आक्षपाटिकः, पुं, (अक्षपटे नियुक्तः। अक्षपट+ठक्।) अक्षदर्शकः। धर्म्माध्यक्षः। इति जटाधरः॥

आक्षपादः, पुं, (अक्षपाद+अण्।) नैयायिकः। इति भूरिप्रयोगः॥

आक्षारणा, स्त्री, क्ली, (आङ्+क्षर+णिच्+युच्।) मैथुनं प्रति आक्रोशः। इत्यमरः॥ परस्त्रीनिमित्तं पुंसः परपुरुषनिमित्तं स्त्रिया वा दूषणं। यथा "कृतागम्यागमनस्त्वं स्थानान्तरं गच्छ"। इति भरतः॥ कुनालि अपवाद इति भाषा॥

आक्षारितं, त्रि, (आङ्+क्षर+णिच्+क्त।) परस्त्रियां परपुरुषे वा मैथुनं प्रति मिथ्यादूषितं। अपवादग्रस्तं। इत्यमरः॥

आक्षिकः, पुं, आच्छुकवृक्षः। इति रत्नमाला॥ आचेर गाछ इति भाषा। (द्यूतनिमित्तः। पाशक्रीड़ाविषयकः। अत्र अक्षैर्दीव्यति जितो वा इति अक्ष+ठञ्। यथा मानवे।८।१५९।
"प्रातिभाव्यं वृथादानमाक्षिकं सौरिकञ्च यत्।
दण्डशुल्कावशेषञ्च न पुत्रो दातुमर्हति"॥
("पित्तश्लेष्मघ्नमम्लञ्च वातिकञ्चाक्षिकीफलं।
मधुराम्लविपाकञ्च वातपित्तहरञ्च तत्"॥
इति चरकः॥
"आक्षिकः पाण्डुरोगघ्नो व्रण्यः संग्राहको लघुः"।
इति सुश्रुतः॥)

आक्षीव, पुं, (आङ्+क्षीव+अच्।) अक्षीवः। शोभाञ्जनवृक्षः। इति रायमुकुटः॥

आक्षेपः, पुं, (आङ्+क्षिप्+घञ्।) अपवादः। इत्यमरः॥ भर्त्सनं। (यथा—नीतिशतके।४२॥
'क्षान्त्येवाक्षेपरुक्षाक्षरमुखरमुखान्दुर्म्मुखान्दूषयन्तः
सन्तः साश्चर्य्यचर्य्या जगति बहुमता कस्यनाभ्यर्थनीयाः'
आकर्षणं।
("नवपरिणयलज्जाभूषणां तत्र गौरीं।
वदनमपहरन्तीं तत्कृताक्षेपमीशः"॥
इति कुमारे। ७। ९५। विन्यासः। स्थापनं।
"कर्णार्पितो लोध्रकषायरूक्षे
गोरोचनाक्षेपनितान्तगौरे।
तस्याः कपोले परभागलाभात्"।
इति कुमारे। ७। १७ अपहरणं। यथा,—
"यत्रांशुकाक्षेपविलज्जितानां"। १। १४ कुमारे। उपस्थितिः। यथा साहित्यदर्पणम्।
"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये"।
इति।) काव्यालङ्कारः। इति मेदिनी॥ (अलङ्कारप्रकरणे विशेषो द्रष्टव्यः।)

आक्षेपकः, पुं, (आङ्+क्षिप्+ण्वुल्।) निन्दाकरः। व्याधः। इति मेदिनी॥ वातरोगविशेषः। तस्य कारणलक्षणे। निदाने यथा—
"यदा तु धमनीः सर्व्वाः कुपितोऽभ्येति मारुतः।
तदा क्षिपत्याशु मुहुर्मुहुर्देहं मुहुश्चरः॥
मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृतः"।

आक्षोटः, पुं, (अक्षोट एव स्वार्थे अण्।) अक्षोटवृक्षः। पर्व्वतजपीलुवृक्षः। इति शब्दरत्नावली॥
("वातामाभिषुकाक्षोटमकूलकनिकोचकाः।
गुरूष्णस्निग्धमधुरा सोरुमाणा बलप्रदाः।
वातघ्ना वृंहणा वृष्याः कफपित्ताभिवर्द्धनाः"॥
इति चरकः॥)

आक्षोड़ः, पुं, आक्षोटवृक्षः। इत्यमरटीकायां भरतः॥

आक्षोदनं, क्ली, (आङ्+क्षुद्+ल्युट्।) मृगया। इत्यमरः॥

आखण्डलः, पुं, (आङ्+खण्ड+कलच्।) इन्द्रः। इत्यमरः॥ (यथा कुमारसम्भवे। तृतीयसर्गे।११।
"आखण्डलः काममिदं बभाषे"।)

आखनिकः, पुं, (आङ्+खन+इकन्।) चौरः। उन्दुरुः। शूकरः इति मेदिनी॥ (खनित्रादिकं खननसाधनद्रव्यं। खननकर्त्ता।)

आखातं, पुं, क्ली, (आङ्+खन्+क्त।) अखातं। देवखातं। इत्यमरटीकायां रायमुकुटः॥

आखुः, पुं, (आङ्+खन+कुः।) मूषिकः। इत्यमरः॥ (यथा नीतिशतके। "कृत्वाखुविवरं स्वयं निपतितो नक्तं मुखे भोगिनः"।) शूकरः। चौरः।